पालबधः इति काव्यनामाङ्कयोगः । एवमन्यत्रापि यथा-यथमूहम् गतिचित्रं गत्याविलोमगत्या तुरङ्गादिगत्या वा चित्रं तच्च यमकभेद एव यथोक्तं दण्डिना । "आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा । यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्" तत्र पादगता विलोमावृत्तिर्यथा "यामताशक्रतायासा सायाता क्षयता मया" । रमणारकता तेऽस्तु स्तुते ताकरणामर" अर्द्धगता यथा । "सा रमानवरारोहा नगेभागमनाहि या । याहि नामग! भागेन हारोरा वनमार सा" श्लोकगा यथा । "यान मानयमारावि कयोनानजनासना । यासुदारशताधीना मायामायमनादि सा । सादिनामयमाया मानाधीता शरदाऽसुया । नासना जनना शोकविरामाय न मानया" ॥ तथाच पादविलोमावृत्तौ अयुक्पादयोर्गतिः युक्पादयोः प्रत्यागतिः । अर्द्धावृत्तौ प्रथमपादाभ्यां गतिः शेषाभ्यां प्रत्यागतिरिति गतिप्रत्यागतिरूपचित्रमित्यवधेयम् । श्लोकावृत्तौ तु पादचतुष्टयेन गतिः प्रतिगत्या श्लोकान्तरमिति भेदः । इत्येवं गतिचित्रम् । तुरङ्गगतिचित्रं यथा "क्रमात् पादचतुष्कस्य पङ्क्तिशः परिलेखने । तुरङ्गपादायातेन श्लोकोऽन्यउपजायते" स०क० । यथा ।

वा१	ला२०	सु६	का२०	ल२	वा२४	ला११	सा२६
का१६	न्ति१६	ला२	ल२६	क१०	ला२७	लि४	ता२२
स२१	स्वा८	सु१७	त१४	व२१	तीई	सा२५	रा१२
द१८	पि१५	का३२	व्र७	त२८	ग१३	र्द्धि२२	तप्

अत्र तुरङ्गगत्या "बालाललिततीव्रस्वा सुकला रागतर्पिका। सुदन्तिका वर्द्धिता ता वा सा साला तलल्लासका इति दत्ताङ्कानुसारेण क्रमशोवर्ण्यमाने श्लोकोऽयं जायते । अर्द्धभ्रमगतिचित्रं सर्वतोभ्रमतिगचित्रञ्च यथा । "आद्धरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि । तदिष्टं सर्व्वतोभद्रं सर्व्वतोभ्रमणं यदि" स०क० । तत्रार्द्धभ्रमसूक्तं २६५ पृ ४ । सर्वतोभद्रं तु—

रे	वा	का	नि	नि	का	वा	रे
वा	हि	का	स्व	स्व	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	स्व	भ	व्य	व्य	भ	स्व	नि

अत्रार्द्धभ्रमणवत् सर्व्वं किन्तु पादानामपि अनुलोमविलोमाभ्यां तथैव सर्वतोभ्रमणेन सर्व्वतोभद्रम् एवमन्ये दर्शयिष्यमाणगोमूत्रिकाबन्धोऽपि गोमूत्रगतिमत्त्वात् गतिचित्रमपि । बन्धेन बन्धविशेषेण चित्रम् बन्धचित्रं तच्च नानाविधं तत्र द्विचतुष्कचक्रबन्धो यथा "दृह शिखरिसन्धिमालां बिन्द्यादर्द्धं समाश्रितैर्वर्णैः । द्विचतुष्कचक्रबन्धं नेमिविधौ चापरं भ्रमयेत्" । द्विषट्कूटकबन्ध । "षट्कुग्रन्थः षट्कं व्रजेदिति द्विषट्कूटकबन्धोऽस्त्रिनेमिः" । निविड़ितचक्रबन्धः । "शिखरादन्यतरस्मात् प्रतिपर्व्व भ्रमति रेखा चार्द्धम् । नेमौ तदितरमर्द्धं निविड़ितचक्राभिधे बन्धे" । स०क०एतेषामुद्धारोदाहरणे तत्रैव द्रष्टव्ये । शरपत्रबन्धः "चतुर्ष्वपि च पादेषु पङ्क्तिशोलिखितेष्विह । आदेरादेस्तुरङ्गस्य पादैः पादः समाप्यते" । यथा

न१	म१८	स्ते३	ज२०	ग५	तां२२	गा५	त्र२४
स६	दा२६	न११	व२८	कु१३	ल३०	च्च१५	य३२
स१७	म२	स्ते१६	ज४	स२१	तां६	ना२३	त्र८
सु२५	दा१०	म२७	वा२	न२६	ल१४	च्च२१	या६

अत्र तुरङ्गगत्या स एव श्लोकः । व्योमबन्धः । "अष्टादशशिखरचरीं गोमूत्रिकया चतुष्पदीं न्यस्येत् । पत्राद्यन्तैर्दृष्टः स चित्रो व्योमबन्धोऽत्र"

सुरजबन्धः । "अत्र पादचतुष्केऽपि क्रमशः परिलेखिते । श्लोकपादक्रमेण स्याद्रेखासु सुरजत्रयी" ।

सा१	से१०	ना११	ग२८	म२६	ना१६	र१८	म्रो८
र६	से२	ना२७	सो१२	द२०	ना३०	र७	ता१७
ता१६	र२६	ना३	द१२	ज२१	ना६	म२१	त्त२४
धी२५	र२५	ना१४	ग४	म५	ना२२	म२३	या२२

तद्द्वारस्तु मल्लिनाथेन दर्शितः "तिर्य्यग्रेखालिखेत् पञ्च नवोर्द्धास्तत्र पङ्क्तयः । अष्टकोष्ठाश्चतस्रः स्युस्तासु श्लोकं लिखेत् क्रमात् । तत्राद्यद्वितितुर्यासु तुर्य्यतिद्व्याद्यपङ्क्तिषु । आद्यद्वितिचतुःपञ्चषट्सप्ताष्टमकोष्ठगः । दृश्यते प्रथमः पादश्चतुर्थश्चैवमेव हि । चतुर्थपङ्क्तिप्राथम्यात्प्रथमावधिवीक्षणात् । द्वितीयादाद्यद्वितिर्द्वितुर्य्ये तितुरीयके । तुर्य्यतिद्व्योस्तृतीयाद्ये द्रष्टव्योऽङ्घ्रिर्द्वितीयकः । तृतीयोऽङ्घ्रिर्द्वितीयान्ते आद्यसप्तमषष्ठयोः । द्वितिपञ्चमयोस्तुर्य्यषष्ठसप्तमयोः क्रमात् । तृतीयान्ये च लक्ष्योयमथान्यः क्रम उच्यते ॥ आद्यन्तयुग्मयोः पङ्क्त्योस्विन्त्योगोमूत्रिकाक्रमः । कृत्वैकं च द्वितीयं द्वे द्वयमेकमिति क्रमात् । यद्वा द्वितयमेकं च द्वयमेकं द्वयं पुनः । स्वपङ्क्तिप्रक्रमादेव विन्यासद्वितयं भवेत् ॥ यद्वा प्रथमतुर्य्याङ्घ्री स्वपङ्क्त्योस्तदनुक्रमात् । द्वितीयोऽङ्घ्रिर्द्वितीयस्यां क्रमादाद्यचतुष्टये । व्युत्क्रमाच्च तृतीयस्यामाद्यमेव चतुष्टये । व्युत्क्रमेण द्वितीयस्यां तृतीयस्यां क्रमेण च ।